अध्यायः ५

# भारतं, तद् भारतवर्षम्

> भारते अतीवप्रारम्भिके काले आध्यात्मिकं सांस्कृतिकं च एकत्वं पूर्णं जातं तथा हिमालयस्य समुद्रद्वयस्य च मध्ये अवस्थितमिदम् सर्वस्य महतः मानवत्वस्य एकम् अविच्छेद्यम् अङ्गं जातम्।
>
> \- श्री अरबिन्दः




चित्रम् ५.१. प्रायः त्रयोविंशतिशतात् (२३००) वर्षेभ्यः पूर्वस्य ग्राम्यभारतस्य दृश्यम् (महत्सञ्चीस्तूपस्य उत्तरद्वारम्)

## बृहत्प्रश्नाः ?

१. भारतं वयं कथं व्याख्यास्यामः ?

२. भारतस्य प्राचीननामानि कानि आसन् ?

0681CH05




चित्रम् ५.२. भारतीय-उपमहाद्वीपस्य भौतिकं मानचित्रम्, तस्य काभिश्चित् नदीभिः सह

अद्यत्वे वयं यत् भारतं जानीमः तत् आधुनिकं राष्ट्रम् अस्ति, यस्य सीमा निर्धारितः, राज्यानि निर्धारितानि, जनसंख्या च परिगणिता अस्ति। परन्तु अद्यारभ्य पञ्चशतवर्षेभ्यः (५००) प्राक्, द्विसहस्रवर्षेभ्यः (२०००) प्राक्, पञ्चसहस्रवर्षेभ्यः (५०००) प्राक् वा स्थितिः इत्थं नासीत्। विश्वस्य अयं प्रदेशः, यो हि 'भारतीय-उपमहाद्वीपः' इति नाम्ना ख्यातः, तत्र विविधानि नामानि, विविधाः चलमानाः सीमानश्च सन्ति। वयं विविधेभ्यः ग्रन्थेभ्यः भारतस्य इतिहासं क्रमविकासं च ज्ञातुं शक्नुमः। आगच्छन्तु, अन्विषामः।

### विषयेऽस्मिन् चिन्तयामः


अस्य अध्यायस्य आरम्भकाले भारतीय-उपमहाद्वीपस्य भौतिकं मानचित्रं विचारयामः। तस्य काः प्राकृतिकाः सीमाः भवन्तः/भवत्यः चिह्नितुं शक्नुवन्ति?

इतिहासे भारतं बहुविधैः नामभिः आहूतम् आसीत् - अस्य निवासिभिर्वा बहिरागतैर्वा। एतानि नामानि प्राचीनग्रन्थेभ्यः, अभ्यागतानां तीर्थाटकवृत्तान्तेभ्यः, शिलालेखेभ्यश्च अस्माभिः ज्ञायन्ते।

**निवासिनः :** ये जनाः कस्मिंश्चित् विशिष्टे स्थाने निवासं कुर्वन्ति।

## भारतीयैः भारतस्य नामकरणं कथं कृतम् ?

भारतस्य प्राचीनतमो ग्रन्थः ऋग्वेदः; यस्य विषये वयं सप्तमे अध्याये ज्ञास्यामः। अयं ग्रन्थः शतसहस्रेभ्यः संवत्सरेभ्योऽपि प्राचीनतमः। अस्मिन् ग्रन्थे अस्य उपमहाद्वीपस्य उत्तरपश्चिमः भागः 'सप्तसिन्धवः' इति नाम्ना ख्यातः, यस्यार्थः 'सप्तानां नदीनां भूमिः' इति। सिन्धवः इति शब्दः 'सिन्धु' इत्यस्मात् शब्दात् आगतः, यश्च अद्यतनीयां सिन्धुनदीं तत्कालीनः नदीर्वा निर्दिशति।




चित्रम् ५.३. भारतीय-उपमहाद्वीपस्य उत्तरपश्चिमः भागः

© NCERT not to be published

कालान्तरे भारतस्य विविधानां प्रान्तानां नामानि साहित्ये वयं पश्यामः। भारतस्य प्रसिद्धेषु ग्रन्थेषु अन्यतमो हि महाभारतम् इति ('अस्माकं सांस्कृतिकम् ऐतिह्यं ज्ञानपरम्परा च' इत्याख्ये विषयसन्दर्भे वयम् इदं पठामः)। रोचकम् इदमस्ति यत्, अस्मिन् ग्रन्थे नैकानां प्रदेशानां नामानि उल्लिखितानि सन्ति, यथा - काश्मीरः (प्रायेण अद्यतनीयः कश्मीरः एव), कुरुक्षेत्रम् (अद्यतनीयस्य हरियाणाप्रदेशस्य एकः भागः), वङ्गः (बङ्गप्रदेशस्य एकः भागः), प्राग्ज्योतिषः (प्रायः अद्यतनीयः असमप्रदेशः), कच्छः (अद्यतनीयः कच्छप्रदेशः), केरलम् (प्रायः अद्यतनीयः केरलप्रदेशः) इत्यादीनि।

## एहि, वयम् अन्विषामः



ऊनाशीतितमे (७९) पत्रे (चित्रम् ५.४) प्रदत्तस्य मानचित्रस्य कस्यापि प्रदेशस्य नाम स्मरन्ति वा? यानि नामानि भवन्तः/भवत्यः जानन्ति तेषां एकां सूचीं निर्मान्तु।


किन्तु अस्य सम्पूर्णस्य भारतीय-उपमहाद्वीपस्य किं नाम? अस्य प्रश्नस्य उत्तरप्रदानं तथा सरलं नास्ति यतो हि प्राचीनानां भारतीयग्रन्थानां कालनिर्धारणम् अत्यन्तं क्लिष्टम् अस्ति। महाभारते अयम् उपमहाद्वीपः 'भारतवर्षम्' 'जम्बूद्वीपः' इति वा नामभ्यां सूचितः, किञ्च विद्वांसः इदं स्वीकुर्वन्ति यत् इदं काव्यं ख्रीष्टजन्मनः बहुभ्यः शताब्दीभ्यः अपि पूर्वं रचितम्।

प्रथमं पदं 'भारतवर्षम्' इति पदं स्पष्टतया सम्पूर्णमेव उपमहाद्वीपं बोधयति। अपि च अस्मिन् नाम्नि नैकाः नद्यः जनाश्च अन्तर्भाविताः। 'भारतवर्षम्' इत्यस्य अर्थः 'भरतानां देशः' इति। 'भरत' इति नाम प्रथमवारम् ऋग्वेदे प्राप्यते, यत्र अनेन पदेन वैदिकजनानाम् एका गोष्ठी सूचिता। अर्वाचीनेषु साहित्येषु 'भारत' इति नाम नैके राजानः स्वीकृतवन्तः इत्युल्लेखः प्राप्यते।

'जम्बूद्वीपः' इति द्वितीयपदस्य अर्थः 'जम्बुवृक्षस्य फलस्य द्वीपः' इति। एषः वृक्षः भारतस्थः एकः स्थानीयः वृक्षः यः 'जम्बुलवृक्षः', 'मालाबर-पामवृक्षः' इत्यादिभिः नामभिः उच्यते। तस्मात् 'जम्बूद्वीपः' इति अभिधया भारतीय-उपमहाद्वीपः बुध्यते।

वस्तुतः, वयम् एकस्मात् प्रसिद्धात् भारतीयसम्राजः एकाम् उत्तमां सूचनां प्राप्नुमः। तस्य नाम सम्राट् अशोकः इति, यस्य विषये वयम् अग्रे जास्यामः। साम्प्रतं वयं तस्य कालः ख्रीष्टपूर्वः पञ्चाशदुत्तर-द्विशतम् (२५०) इति स्वीकुर्मः। वयं जानीमः यत् सः सम्राट्

© NCERT not to be republished




चित्रम् ५.४. महाभारते सूचितानां कतिपयानां प्रदेशानां मानचित्रम्। (तेषु बहवः राज्यरूपेणापि ग्रन्थे उल्लिखिताः सन्ति ।) भवद्भिः तेषां प्रदेशानां स्मरणं न कर्तव्यं, परन्तु ते उपमहाद्वीपस्य सम्पूर्णं भागं कथं आच्छादयन्ति इति अवलोकयन्तु

© NCERT not to be republished

नैकान् अभिलेखान् शिलालेखान् वा अरचयत्। तेषु एकत्र सः सम्पूर्णं भारतं बोधयितुं 'जम्बूद्वीपः' इति शब्दम् उपयुक्तवान्, यश्च न नूनम् अद्यतनीयं भारतवर्षम्, अपि तु बङ्गदेशम् पाकिस्तानदेशम् अफगानिस्तानप्रदेशांशम् अपि अन्तर्भावयति।

कतिपयशताब्दीभ्यः परं 'भारतम्' इति अभिधा सामान्येन भारतीय-उपमहाद्वीपाय प्रयुज्यते स्म। यथा विष्णुपुराणाख्ये प्राचीनग्रन्थे वयं पठामः -

**उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणं**
**वर्षं तद् भारतं नम ...**

"सः देशः यो हि सागरस्य उत्तरस्यां दिशि, हिमशैलस्य दक्षिणस्यां दिशि चास्ति, सः एव भारतम्" इति।

'भारत' इति नाम अद्यापि व्यवह्रियते। उत्तरभारते सामान्यतया 'भारत' इति लिख्यते, परन्तु दक्षिणभारते तु 'भारतम्' इति कथ्यते।

### अस्मिन् विषये चिन्तयामः

किं भवन्तः 'हिमयुक्ताः पर्वताः' इति परिचितवन्तः? भारतस्य यद् वर्णनम् अत्र प्रदत्तम्, किं तद् भवतां मते युक्तम् अस्ति?

इदं बहु रोचकमस्ति यत् देशस्य प्रान्तेषु स्थिताः सर्वे भारतीयाः भारतस्य एतां परिभाषाम् अङ्गीकुर्वन्ति। यथा, अद्यप्रभृतयः द्विसहस्रवर्षेभ्यः प्राक् रचिते एकस्मिन् प्राचीने तमिलसाहित्यस्थे पद्ये एकस्य राज्ञः प्राशस्त्यप्रसङ्गे प्रोक्तं यत्, "तस्य राज्ञः कीर्तिः दक्षिणायाः कन्याकुमार्याः, उत्तरात् हिमालयात् पूर्वपश्चिमयोः सागरं यावत् विस्तृता..." इति। इदं श्रुत्वा भवन्तः/भवत्यः ज्ञातुं शक्नुवन्ति यत् 'उत्तरप्रान्ते हिमालयः अस्ति', किञ्च दक्षिणप्रान्ते 'केप् कन्याकुमारी' इत्यपि भवन्तः परिचिनोतुं शक्नुवन्ति। एतेन इदमपि ज्ञायते यत् प्राचीनाः भारतीयाः अत्रस्थस्य भूगोलस्य विषये साधु जानन्ति स्म!

© NCERT not to be republished



## मा विस्मरन्तु

भारतीयसंविधानम्, यद्धि आदौ आङ्गलभाषायां लिखितम् आसीत्, तत्र संविधानस्य आरम्भे 'इन्डिया, तत् भारतम्' इति वाक्यं प्रयुक्तम् अस्ति। समानरीत्या संविधानस्य हिन्दीसंस्करणे 'भारतम्, तद् इन्डिया' इति वाक्यम् उल्लिखितम् अस्ति।

## एहि, वयम् अन्विषामः

५.५ तमे चित्रे (द्व्यशीतितमे पत्रे) भारतसंविधानस्य मुख्यसंस्करणस्य पुनर्निर्मितं प्रथमं पत्रं यदस्ति, तत्र 'भारतम्, तद् भारतवर्षम्' इति वाक्यं भवन्तः चिह्नितुं शक्नुवन्ति वा?

**संविधानम् :**

एकं पत्रं यद्धि राष्ट्रस्य मूलभूतान् सिद्धान्तान् नियमान् च बिभर्ति। भारतस्य संविधानं पञ्चाशदुत्तर-ऊनविंशतितमे (१९५०) वर्षे कार्यान्वितं जातम्। अस्मिन् विषये भवन्तः/भवत्यः सप्तमश्रेण्यां पठिष्यन्ति।

## विदेशिनः कथं भारतस्य नामकरणम् अकुर्वन् ?

ये वैदेशिनः भारतम् उल्लिखितवन्तः, तेषु प्रथमाः आसन् पारस्यजनाः, ये ईरान्-देशस्य प्राचीनाः निवासिनः आसन्। ख्रीष्टपूर्वे षष्ठे शतके एकः पारस्यः सम्राट् एकं सैन्याभियानं कृत्वा सिन्धुनद्याः प्रदेशं स्वस्य अधीने अनयत्, यश्च प्रदेशः आदौ 'सिन्धुः' इति नाम्ना ख्यातः आसीत्। अतः इदं न आश्चर्यप्रदं यत्, तेषां प्राचीनेषु अभिलेखेषु प्रस्तरलेखेषु च पारस्याः भारतं 'हिन्दः', 'हिदुः' अथवा 'हिन्दुः' इत्यादिभिः नामभिः परिचायितवन्तः, यानि 'सिन्धुः' इत्यस्यैव तेषां भाषासु अनुवादः इति। (इदमत्र ध्येयं यत्, प्राचीनायां पारस्यभाषायां 'हिन्दुः' इति यः शब्दः उल्लिखितः आसीत्, सः पूर्णतः भौगोलिकप्रदेशस्यैव सूचकः, अस्य हिन्दुधर्मेण सह न कश्चिदपि सम्बन्धो वर्तते।)


एतान् पारस्याभिलेखान् आश्रित्य प्राचीनाः ग्रीकजनाः इमं प्रदेशं 'इण्डोई', 'इण्डिके' इत्यादिभिः नामभिः अबोधयन्। ते 'हिन्दुः' इति शब्दस्य आद्यक्षरं 'ह' इति अत्यजन्, यतो हि सः अक्षरः ग्रिकभाषायां नैव वर्तते।

**सिन्धुः → हिन्धुः → इन्दोई / इन्दिके**

प्राचीनाः चीनीजनाः अपि भारतेन सह सम्बद्धाः आसन्। बहुषु ग्रन्थेषु ते भारतं 'यिन्तुः', 'यिन्दुः' इत्यादिभिः शब्दैः निरदिशन्। अयमपि शब्दः मुख्यतः 'सिन्धुः' इत्यस्मादेव शब्दात् आगतः। कथमपि अधः दर्शितम् -

**सिन्धुः → हिन्धुः → इन्दुः → यिन्दुः**

© NCERT not to be republished



Part I

The Union and its Territory

Name and territory of the Union.

1. (1) India, that is Bharat, shall be a Union of States.

(2) The States and the territories thereof shall be the States and their territories specified in Parts A, B and C of the First Schedule.

(3) The territory of India shall comprise—

(a) the territories of the States;

(b) the territories specified in Part D of the First Schedule; and

(c) such other territories as may be acquired.

Admission or establishment of new States.

2. Parliament may by law admit into the Union, or establish, new States on such terms and conditions as it thinks fit.

Formation of new States and alteration of areas, boundaries or names of existing States.

3. Parliament may by law —

(a) form a new State by separation of territory from any State or by uniting two or more States or parts of States or by uniting any territory to a part of any State;

(b) increase the area of any State;

(c) diminish the area of any State;

(d) alter the boundaries of any State;

(e) alter the name of any State:

Provided that no Bill for the purpose shall be introduced in either House of Parliament except on the recommendation of the President and unless, where the proposal contained in the Bill affects

1

चित्रम् ५.५. भारतीयसंविधानस्य प्रथमं पत्रम्
(स्रोतः - मूलस्य भारतीयसंविधानस्य पुनर्मुद्रणम्, संस्कृतिमन्त्रालयः, भारतसर्वकारः, २०००)

© NCERT not to be republished



## मा विस्मरन्तु

यूयेन्साङ्ग ख्रीष्टाब्दायां सप्तमशताब्द्यां चीनदेशात् भारतम् आगच्छत्। सः भारतस्य विविधेषु प्रान्तेषु भ्रमणम् अकरोत्, विविधैः विद्वद्भिः सह अमेलत्, विविधान् बौद्धग्रन्थान् आकलयत्, तदनन्तरञ्च सप्तदशवर्षेभ्यः परं चीनदेशं गतवान्। प्रत्यावर्तनात् परं तस्य भारतभ्रमणकाले तेन ये संस्कृतग्रन्थाः स्वीकृताः आसन्, तेषां चीनभाषायाम् अनुवादः कृतः तेन। परम् अग्रिमासु शताब्दीषु नैके चीनविद्वांसः भारतभ्रमणम् अकुर्वन्।



अन्यः चीनीशब्दः 'तायञ्जुः' इति, 'सिन्धुः' इत्यस्मात् शब्दात् आगतः अस्ति, यस्यार्थः भवति - 'स्वर्गीयः स्वामी' इति। अनेन शब्देन बुद्धस्य जन्मभूमित्वात् भारतं प्रति प्राचीनानां चीनवासिनां कीदृशी श्रद्धा आसीदिति अवगम्यते।

भवन्तः/भवत्यः प्रायः 'हिन्दुस्तानः' इत्यनेन अपेक्षितेन नवीनेन शब्देन सह बहुधा परिचिताः स्युः, परन्तु भवन्तः/भवत्यः प्रायः अनवगताः स्युः यत् अयं शब्दः अद्यारभ्य: प्रायः अष्टादशशतवर्षेभ्यः प्राक् एकस्मिन् पारस्याभिलेखे प्रथमवारं व्यवहृतः आसीद् इति! अर्वाचीने काले भारतीय-उपमहाद्वीपं बोधयितुम् अयं शब्दः बहुधा भारतम् आक्रमद्भिः प्रयुक्तः आसीत्।

## एहि, वयम् अन्विषामः



विविधासु भाषासु भारतस्य विविधानां नाम्नाम् इमां सरणीं पूरयितुं शक्नोति ?

| | |
|---|---|
| पारस्यभाषायाम् | |
| ग्रीकभाषायाम् | |
| लैटिन-भाषायाम् | इण्डिया |
| चीनभाषायां | |
| आरब-पारस्यभाषयोः | |
| आङ्गलभाषायाम् | इण्डिया |
| फ्रेञ्चभाषायाम् | इण्डे |



© NCERT not to be republished



## अग्रे गमनात् प्राक् ...

- भारतम् एका प्राचीना भूमिः, यस्य इतिहासक्रमे नैकानि नामानि सन्ति।
- भारतस्य प्राचीनाः निवासिनः अस्य नाम अददुः - 'जम्बूद्वीपः', 'भारतम्' इति च। द्वितीयं नाम आधिक्येन प्रसिद्धं जातम्, यद्धि अर्वाचीने काले भारतवर्षस्य नामरूपेण नैकासु भारतीयभाषासु स्वीकृतम्।
- भारतस्य वैदेशिकाः दर्शकाः, आक्रमणकारिणश्च मुख्यतः सिन्धुनद्याः यन्नाम आगतं तदेव अचिन्वन्। ततः तेषां नये भारतस्य नाम जातम्, 'हिन्दुः', 'इण्डोई' इति च, यद्धि परवर्तिने काले 'इण्डिया' इति नाम्ना परिवर्तितम्।

## प्रश्नाः, क्रियाकलापाः परियोजनाश्च

१. अस्य अध्यायस्य आरम्भे या उद्धृतिः प्रदत्ता अस्ति, तस्य अर्थः कः स्यादिति विचारयतु।

२. निश्चिन्वन्तु - सत्यम् असत्यं वा ?

- ऋग्वेदः सम्पूर्णस्य भारतस्य भौगोलिकं चित्रम् अवर्णयत्।
- विष्णुपुराणे सम्पूर्णस्य भारतीय-उपमहाद्वीपस्य वर्णता प्रदत्ता अस्ति।
- अशोकस्य काले 'जम्बुद्वीपः' इति यः प्रदेशः उक्तः आसीत्, तन्मध्ये अद्यतनीयः भारतवर्षम्, बङ्गदेशः, पाकिस्तानदेशः, अफगानिस्तानदेशस्य कश्चिद् भागश्च अन्तर्भाविताः।
- महाभारते अनेकेषां स्थानानाम् उल्लेखः प्राप्यते, यथा - कश्मीरः, कच्छः,केरलम् इत्यादीनि।
- 'हिन्दुस्तानः' इति पदं द्विसहस्रवर्षेभ्यः प्राक् एकस्मिन् ग्रीकशिलालेखे प्रथमवारं प्राप्तम् आसीत्।
- प्राचीनायाः पारस्यभाषायां व्यवहृतः 'हिन्दुः' इति शब्दः हिन्दुधर्मं निर्दिशति।
- 'भारतम्' इति अभिधा भारताय वैदेशिकाः परिव्राजकाः अयच्छन्।

३. यदि भवान्/भवती अद्यप्रभृतिभ्यः द्विसहस्रवर्षेभ्यः प्राक् जातः/जाता आसीत्, किञ्च यदि भारतस्य नामकरणाय अवसरः प्राप्येत, तर्हि भवान्/भवती किं नाम स्वीकरिष्यति? कुतः तन्नाम स्वीकरिष्यति? स्वीयकल्पनां वर्णयतु!

४. प्राचीनकाले विश्वस्य विविधेभ्यः प्रान्तेभ्यः विविधाः जनाः भारतं भ्रमितुं कुतः आगच्छन्ति स्म? एतादृशीं दीर्घां यात्रां समापयितुं किं तान् प्रोत्साहयति स्म? (सङ्केतः - न्यूनातिन्यूनं चतस्रः पञ्च वा तादृशीः प्रेरणाः लिखतु)

© NCERT not to be republished